Register Number:

Date:

**ST. JOSEPH'S COLLEGE (AUTONOMOUS), BANGALORE-27**
**B.SC, B.A, B.COM & BBA - IV SEMESTER**
**SEMESTER EXAMINATION: JULY 2022**
**SA 418 - SANSKRIT**

**Time- 2 1/2 hrs** **Max Marks-70**

I. **दशानाम् एकवाक्येन संस्कृतभाषया उत्तरं लिखत।** **10×1=10**

अ) न्यासस्य रक्षणं किम्?
आ) पद्मावती केन क्रीडति?
इ) उदयनः कः ?
ई) पर्वततिलकं किम्?
उ) स्वप्नवासवदत्ता नाटकस्य कर्ता कः?
ऊ) वसन्तकः कः?
ऋ) शरचापहीनः कामदेवः कः?
ॠ) वीणायाः अपरं नाम किम्?
ऌ) मङ्गलं कति विधम्?
ए) भासेन करि रूपकाणि लिखितानि?
ऐ) सत्यवती का?
ओ) धात्री का?

II. **रिक्तथानं पूरयत।** **6×1=6**

2. निभृतं तपोवनमिदं ______________ ।
क) वनमभिगम्य ________________ ।
ख) तीर्थोदकानि समिधः ______________ ।
ग) यद् यस्यास्ति _____________ कस्याद्य किं दीयताम्।
घ) सुखमर्थी ___________________ तपः।
ङ) स्वैरं वनात् ______________ तपोधनानि।
च) प्रद्वेषो बहुमानो वा _____________ ।

III. **अन्वय-अन्वयार्थ-तात्पर्यं च लिखत।** **2×7=14**

3. पद्मावती नरपतेर्महिषी भवित्री
दृष्ट्वा विपत्तिरथ यैः प्रथमं प्रदिष्टा।
तत्प्रत्ययात् कृतमिदं न हि सिद्धवाक्यान्
व्युत्क्रम्य गच्छति विधिः सुपरीक्षितानि॥

4. सविश्रमो ह्ययं भारः प्रसक्तस्य तु श्रमः।
तस्मिन् सर्वमधीनं हि यत्राधीनो नराधिपः॥

5. भित्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः।
घृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः॥

**IV. सविस्तरं लिखत।** **2×10=20**

6. दण्डिकवेः देशकालकृतिमधिकृत्य प्रबन्धं लिखत।
7. स्वप्नवासवदत्ता नाटकं संक्षेपेण लिखत।
8. भासस्य त्रयोदशनाटकानि अधिकृत्य लिखत।

**V. पात्रपरिचयं कुरुत।** **2×5=10**

छ) उदयनः
ज) पद्मावती
झ) रुमण्वान्

VI. **अनुच्छेदं पठित्वा उत्तरत।**

अस्मिन् जगति बहूनि बहुमूल्यानि वस्तूनि सन्ति। परन्तु सर्वेषां बहुमूल्यवस्तूनाम् अपेक्षया माता श्रेष्ठा भवति। अतः एव उक्तम् – "जननी जन्मभूमिः च स्वर्गादपि गरीयसी" इति। बालकान् प्रति मातॄणां सहजः सरलः स्वाभाविकः च स्नेहः भवति। एतादृशः सरलः स्नेहः कुत्रापि न अवलोक्यते। जननी पुत्राणां कृते स्वकीयं सर्वस्वम् अपि त्यक्तुं शक्नोति। जनन्याः सर्वदा एव इयम् इच्छा भवति यत् मम पुत्रः सुखी, गुणवान्, विद्वान् एव भवतु। सर्वेषां जनानां मध्ये अग्रगण्यो भवतु इति। माता महत्कष्टम् अविगणय्य बालकस्य सुखं चिन्तयति। अतः पुत्रस्य कृते अपि मातुः अधिकं न किमपि वस्तु पूजनीयं वर्तते। कदाचित् पुत्रोऽपि कुपुत्रः भवेत् परन्तु माता कुमाता कदापि न भवेत्। मातुः आशिषं प्राप्य पुत्राः बहवः महत्कार्यम् अकुर्वन्। माता एव श्रेष्ठानामपि श्रेष्ठा, पूज्यानामपि पूज्यतमा वर्तते। अत एव उक्तम् उपनिषदि – मातृदेवो भव इति।

9. सर्वेषां वस्तूनाम् अपेक्षया का श्रेष्ठा भवति? 5×2=10

ट. स्वर्गादपि गरीयसी का?

ठ. मातृविषये उपनिषदि किम् उक्तम्?

ड. माता किम् अविगणय्य बालकस्य सुखं चिन्तयति?

ढ. गद्यस्य समुचितं शीर्शकं लिखत।